# अध्याय-६

# प्रतिपादितविषयाणां समीक्षा-व्यवहारिकं मार्गदर्शनं च।

# अध्याय-६

## प्रतिपादितविषयाणां समीक्षा-व्यवहारिकं मार्गदर्शनं च।

### १.प्रतिपादितविषयाणां समीक्षा व्यवहारिकं मार्गदर्शनं च –

वास्तुशास्त्रं भूमिः, गृहं, ग्रामं, पुरं, नगरं, पत्तनं, पुटभेदनं, मार्गाः, उद्यानं, तडागमित्यादीनाम् उद्बोधकमस्ति। परन्तु आधुनिकसमये सामान्यजनाः वास्तुशास्त्रमर्थात् '**निवासोपयोगी भूमिः**' एवं '**भवनम्**' इति एव मन्यन्ते। मानवानां त्रिधा मूलमूता महत्त्वपूर्णमावश्यकता भोजनम्, वस्त्रम्, गृहं च वर्तते। गृहं मानवानां कृते सर्वाधिकं महत्त्वपूर्णमावश्यकमस्ति। सर्वेषां कृते शीतोष्णादिकैः सुरक्षाहेतवे गृहं परमावश्यकमस्ति। प्रमुखवास्तुशास्त्रीयग्रन्थेषु भूम्याः मुख्यवास्तुरूपेण स्वीकृतिरस्ति। मयमतम् इति ग्रन्थानुसारम् –

**भूमिप्रासादयानानि शयनं च चतुर्विधम्।**
**भूरेव मुख्यवस्तु स्यात् तत्र जातानि यानि हि।।**
**प्रासादादीनि वास्तूनि वास्तुत्वाद् वस्तुसंश्रयात्।**
**वस्तून्येव हि तान्येव प्रोक्तान्यस्मिन् पुरातनैः।।**[१]

तथा मानसारग्रन्थेऽपि यथोक्तम् –

**धरा हर्म्यादि यानं च पर्यङ्कादि चतुर्विधम्।**
**धरा प्रधानवस्तु स्यातत्तज्जातिषु सर्वशः।।**[२]

---

[1] मयमतम्, अ.२.२-३

[2] मानसार, १.२

कारणं यानं, प्रासादादिसर्ववस्तूनां मुख्याधारः भूरेव अस्ति।

वास्तुशास्त्रीयग्रन्थेषु वास्तुशास्त्रस्य सिद्धान्तानां वा नियमानां प्रतिपादनं विद्यते। वास्तुशास्त्रीयग्रन्थेषु भूमिः, भवनं, ग्रामं, नगरं, पत्तनमेवं राजमार्गादीनां निर्माणविषयकस्य वर्णनं तथा तत्र निवासकर्तृणां कार्यकर्तृणां जनानां च अधिकतमं सुविधायाः एवं सुरक्षायाः प्राप्त्यर्थस्य नियमानां सिद्धान्तानां विधि–प्रविधीनां विवेचनं दृश्यते।

अस्माकं प्राचीनवास्तुशास्त्रीयग्रन्थेषु वास्त्वाचार्याणां दीर्घचिन्तनं, मतं वस्तुतः प्राचीनकालस्य अपेक्षया अधुना अधिकतमं महत्त्वपूर्णमेवं प्रासङ्गिकं प्रतीतं भवति। अस्माकं प्राचीनवास्तुशास्त्रीयग्रन्थेषु प्रतिपादितं ग्रामस्य, नगरस्य, मार्गस्य, गृहस्य, भवनस्य प्रत्येकानां रचनानियमेषु प्राकृतिकशक्तिस्रोतानाम् अधिकाधिकमुपयोगं कृत्वा सामञ्जस्यस्थापनस्य महत्त्वं दृश्यते।

एतेषु ग्रन्थेषु प्रत्येकरचनायां योजनापद्धत्या महत्त्वं वर्तते। तत्र भवनं, जनपदं, खेटः, ग्राम, पुरादीनां निमार्णसम्बन्धिताः प्रमुखनियमाः निम्नलिखिताः सन्ति। यथा च –

(१) भूपरिग्रहणमेवं भूपरीक्षा।

(२) शङ्कुस्थापनमेवं दिङ्निर्णयः।

(३) मानविभाजनम्।

(४) वास्तुपदविन्यासः।

(५) सुरक्षोपायाः – दुर्गः–वप्रः–प्राकार;–परिखायाः निर्माणम्।

(६) शिलान्यासः।

(७) मार्गव्यवस्था।

(८) जातिवर्णाधिवासः अथवा नगरे अधिवासः।

(९) सुरक्षोपायाः – दुर्गः–वप्रः–प्राकारः–परिखायाः निर्माणम्।

(१०) अलङ्ककरणम्।

अधुना उपरोक्त प्रमुखनियमानां वर्णनं संक्षिप्तरूपेण वर्तते। यथा –

(१) **भूपरिग्रहणमेवं भूपरीक्षा** –

कस्यापि नगरस्य वा ग्रामस्य वा अन्यनिवासस्थानानां निवेशनार्थं प्रप्रथममावश्यकता स्थानं, तस्य चतुर्दिक्समीपस्थवातावरणं, जलवायु:, उपर्युक्तभूमि: इत्यादय: सन्ति। अर्थात् नगरादीनां निर्माणार्थं प्रथमं महत्त्वपूर्णमनिवार्यं तत्त्वं देश: वा भूमि: अस्ति। सर्वस्थाने भू: एकसमाना नास्ति भवननिर्माणदृष्ट्या क्वचिद् भूमि: प्रशस्ता अस्ति क्वचिद् अप्रशस्ता अस्ति।[३]

अपराजितपृच्छायां विश्वकर्मा पुष्पकविमानद्वारा पृथिव्या: वायुसर्वेक्षणं कृतमिति उल्लेखोऽस्ति।[४] एतादृशां नगरादीनां निवेशन हेतवे उपर्युक्तं प्रदेशचयनं वा भूपरिग्रहणमनिवार्यमस्ति इति निर्दिशयति। अधुना बृहन्नगरं– टाउनशीप– यन्त्रालयं(फेक्टरी), मार्गादीनां निर्माणकार्यपूर्वं भूपरिग्रहणार्थं एतादृशं वायुसर्वेक्षणं परीक्षणं आधुनिकयन्त्रद्वारा भवति। उपरोक्त वायुसर्वेक्षणं द्वारा भूपरिग्रहणार्थं समराङ्गणसूत्रधारग्रन्थे देशस्य वा भूम्या: त्रिधा: वर्गीकरणं दृश्यते। यथा– (१) जाङ्गलदेश:, (२) अनूपदेश:, (३) साधारणदेश:। यथा हि –

**देश: स्याज्जाङ्गलानूपसाधारणतया त्रिधा।**[५]

जलस्याभाव:, कण्टकिनादय:, रूक्षोष्णवायु: तथा कृष्णमृत्तिकायुक्तदेश: जाङ्गलदेश: कथ्यते। अयं देश: निश्चितरूपेण अप्रशस्तदेश: कथितुं शक्यते। तस्य विपरीतं यत्र जलाधिक्यं

---

[3] विश्वकर्मवास्तुशास्त्रम् ,अ. ५.१–५

[4] अपराजितपृच्छा, ३५.१

[5] समराङ्गणसूत्रधार(पूष्पेन्द्र), अ.८.२

वर्तते, स्निग्धः, शीतलादिगुणैः युक्तः, बहुमत्स्यामिष परिपूर्ण नदी, तथा अधिकमात्रायां सुन्दरः स्निग्धाः वृक्षाः स्थिताः यस्मिन् सः देशः निवासहेतवे प्रशस्तः देशः मन्यते। अस्मिन् प्राकृतिक विशेषतायुक्त, कृषिआदीनां कृते उपयुक्त भूभागे नगर–गृहनिर्माणं कृत्वा निवासकरणे तत्र जीवनयापनं सरलं सहजं भवति। तेन अनूपदेशः प्रशस्तदेशः मन्यते।[६] अनेन प्रकारेण जाङ्गलदेशस्य अनूपदेशस्य च मिश्रितलक्षणयुक्तः समशीतोष्णदेशःअपि निवासार्थं प्रशस्तदेशः वर्तते। तदुपरान्त समराङ्गणसूत्रधारग्रन्थे भोजेन भूम्याः अन्यषोडशप्रकाराः अपि दर्शिताः।

**▶ नगरनिवेशनार्थं प्रशस्तभूमिः –**

अग्रे तृतीयाध्याये नगरनिवेशनार्थम् उत्तमभूमि वर्णानुसारं यत्र सदैव कलधौतादिधातवः जायन्ते, धातुस्यन्दोल्लसात्, कुञ्जगुल्मलतावृता, तरुच्छन्ना, उत्तुङ्गा, पृथुशिला, समन्तादवनीधरा, स्वादुजलाभिरावृता, कोकिलालापसुभगा, विचित्रफलपुष्पाढ्या, प्रागुदक्पला, रम्या इत्यादिलक्षणायुक्ता धरा नगरादीनां सन्निवेशनार्थं प्रशस्ता जायते।[७] एतेन स्पष्टं भवति यत् अस्माकं पूर्वजाः प्राकृतिक, सुन्दर वातावरणे जीवननिर्वाहनं कर्तुं इच्छन्ति स्म। वनस्पतिभ्यः सह मित्रता आसीत्। तेषां जीवनयापनस्य अधिकतमं वस्तूनि यथा - नगरगृहनिर्माणद्रव्याणि, जलं, काष्ठं, प्राणवायुः(ऑक्सीजन), इत्यादीनां पूर्ति वनस्पति–प्रकृतिभिः कुर्वन्ति स्म। परन्तु आधुनिककाले प्रकृतिवनस्पतिनामुपयोगो अनियन्त्रितो भवति। तेन पर्यावरणीया हानिः (ग्लोगल वॉर्मिंग) भवति। जनाः स्वस्थजीवनं न जीवन्ति। बहु रोगाः भवन्ति। अतः

---

[6] समराङ्गणसूत्रधार(पूष्पेन्द्र), अ.८.४

[7] समराङ्गणसूत्रधार(पूष्पेन्द्र), अ.८.१५–४२

वनस्पति–प्रकृतीनां सुयोग्यरूपेण उपयोगं कर्तव्यः तथा च अधिकाधिक योग्यवृक्षाणां वपनमपि कृत्वा पर्यावरणस्य संरक्षणं करणीयमिति अस्माकं दायित्वमस्ति।

प्राचीनकालादारभ्य जलस्य महत्त्वं अतीव वर्तते। अस्माकं संस्कृतवाङ्मये यत्र तत्र नदीनां, तडागानां, सरसां, वापी–कूपादीनां वर्णनमधिकमात्रायां विद्यते। अर्थात् एतत् वर्णनम् अस्माकं जीवने जलस्य महत्त्वं प्रतिपादयति। सरित्प्रान्तः सरस्तटश्च धर्मस्य, ज्ञानविज्ञानस्य, दर्शनस्य तथा कलाविषयकपरिचर्चानां कृते स्थानमासीत्। सम्भवतः एतेन अस्माकं भारतदेशस्य प्राचीननगराणि मथुरा, प्रयागः, वाराणसी, हडप्पा, मोहन–जो–दडो आदि नगराणि नदीतटस्योपरि अवस्थितान्यासन्।

समराङ्गणसूत्रधारः, मयमतम्, अपराजितपृच्छा, मनुष्यालयचन्द्रिका, राजवल्लभः, वास्तुविद्या, मानसारः, विश्वकर्मवास्तुशास्त्रम्, शिल्परत्नादिकेषु प्रायः सर्वेषु वास्तुशास्त्रीयग्रन्थेषु भूमीनां प्लवः, ध्वनिः, अङ्कुरः, रसः, वर्णः, स्पर्शः इत्यादीनामाधारेण धरायाः भेदोपभेदाः दर्शिताः।

वास्तुशास्त्रे वर्णितमृत्तिकायाः परीक्षया अस्माकं पूर्वजानां भूगर्भज्ञानमद्भूतमासीत्। सरलविधि युक्तं मृत्तिकायाः परीक्षायाः प्रक्रियाद्वारा नगर–भवनादीनामुपयुक्तमनुपयुक्तं भूनिर्धारणं क्रियते स्म। एषा प्रक्रिया सम्प्रति अपि आधुनिकतमयन्त्रद्वारा भवति। परन्तु प्राचीना मृत्तिकापरीक्षाप्रक्रिया आधुनिकभूगर्भशास्त्री– अभियान्त्रिकाणां कृते अधुना अपि अन्त्यन्तं महत्त्वपूर्णा भवति। एषा प्राचीना परीक्षाप्रक्रिया सम्भवतः भूः कठोरा, अछिद्रा, दृढा अस्ति न वा इति निश्चितं करोति। एतेन भूम्याः दृढतायाः निर्धारणं भवति। कस्यापि भवनस्य आयुष्यं दृढता भूम्याः दृढतोपरि आधारितमस्ति। भवनस्य पीठ–आधरस्य निर्माणकाले भूमिः पाषाणमयी, सिकतामयी, सार्द्रतायुक्ता अस्ति न वा इति अपि द्रष्टव्यमस्ति। अनेन प्रकारेण प्राचीन मृत्तिकापरीक्षाविधिद्वारा भूम्याः दृढता अदृढता आदीनां ज्ञानेन अधुना कालेऽपि

आधुनिक उच्चशिक्षित अभियन्तृणां भवनस्य, सेतुबन्धस्य, सुरङ्गमार्गस्य, मार्गस्य इत्यादीनां निर्माणे एतेषां दृढता एवं दीर्घायु:कृते व्यवहारोपयोगिनी शिक्षा एवं ज्ञानं लभ्यते। एतेन स्पष्टं भवति यत् भूम्या: दृढतानिर्धारणे मृत्तिकापरीक्षाया: अतीव महत्त्वं वर्तते प्राचीनकाले आधुनिककाले अपि च।

(१) **दिङ्निर्णय:** -

किमपि वास्तुकर्मं दिशानिर्धारणं विना न शक्यम्। समस्त वास्तुकर्मणि दिङ्निर्णय: अनिवार्य: मन्यते। भारतीयपरम्परायां प्रत्येकदिशोपदिशानामतीव महत्त्वं वर्तते। पूर्वदिशायाम् अग्नितत्त्वस्य, दक्षिणदिशायां पृथ्वीतत्त्वस्य, पश्चिमदिशायां वायुतत्त्वस्य, उत्तरदिशायां जलतत्त्वस्य महत्त्वं वर्तते। एवं ईशानकोणे जलस्य, अग्निकोणे अग्नितत्त्वस्य, नैऋत्यां पृथ्वीतत्त्वस्य तथा वायव्यां वायो: आधिपत्यं वर्तते। अत: नगर- ग्राम- गृहादीनां तदनुकुलं विन्यासहेतवे विभिन्नदिशोपदिशाया: ज्ञानस्य प्राप्ति: आवश्यक्यस्ति। आधुनिककाले दिक्सूचकयन्त्रस्य (होकायन्त्रं) आविष्कारेण दिशानिर्धारणं सरलं जातम्। परन्तु प्राचीनकाले दिशानिर्धारणं विशिष्टकाष्ठनिर्मितशङ्कुस्थापनं कृत्वा सूर्यच्छाया वा ध्रुवताराया: आधरेण क्रियते स्म। एतेन स्पष्टं भवति यत् भवननगरादीनां निवेशने दिग्ज्ञानं कति महत्त्वपूर्णमस्ति। अत: दिग्ज्ञानेन वास्तुपदविन्यासं वास्तुपुरुषविकल्पनं च कृत्वा तदनुकुलं गृह- ग्राम- खेट- खर्वट- जनपद- नगरादीनां पृथक्-पृथक् अङ्गोपाङ्गानां विविधदिशायां निवेशनमतीव महत्त्वपूर्णं भवति। नगरस्य विविधाङ्गोपाङ्गा: यथा - नगरद्वाराणि, मन्दिराणि, उपवनानि, मार्गा:, यानस्थानकं, सम्प्रतिकाले रेलस्थानकं, लोकयानस्थानकं, रीक्षास्थानकं, औषधालयं, चिकित्सालयं, शस्त्रागारं, राजकीयव्यवहारसम्बन्धितभवनानि, न्यायमन्दिरं, शैक्षणिकभवनानि,

आपण–विपणे, राजकीयभोजनशाला, भोजनशाला, होटल, अतिथिगृहं, कर्मशाला, यन्त्रागारं, उद्यानं, अनुरञ्जनस्थानानि, राजकोषभवनं, विभिन्नप्रशासनिकभवनानि, विभिन्नजातिवर्णाधिवासः एवं विभिन्नकर्मोपजीविनामावासः आदीनां विन्यासहेतवे दिग्ज्ञानं परमावश्यकमस्ति।

अनेन प्रकारेण गृहसन्निवेशने अपि विभिन्नाङ्गानामर्थात् मुख्यप्रवेशद्वारम्, पाकशाला, भोजनशाला, स्वागतकक्षः, भण्डारकक्षः, पूजालयम्, शयनकक्षः, अध्यापनशाला, स्नानागारम्, जलस्थानम्, गृहोद्यानम् आदीनां स्थापनार्थमुपयुक्तस्थाननिर्धारं दिग्ज्ञानं विना न कर्तुं शक्यते। आधुनिककाले प्रायः सोसायटी– टाउनशीप वा भवननिर्माणे निर्माता वास्तुशास्त्रीयसिद्धान्तानामनुपालनं न करोति अपि तु स्वस्य सुविधानुसारं विभिन्नभवनाङ्गानां विन्यासं यत्र–तत्र करोति। फलस्वरूपं अभीलिप्सितं सुखं न प्राप्नोति। अतः किमपि वास्तुकर्मणि दिग्ज्ञानमतवावश्यकमस्ति। विष्णुधर्मोत्तरपुराणानुसारम्

**ऐशान्यां देवतावेश्म तथाग्नेय्यां महानसम्।**
**अग्न्यागारं च तत्रैव भ्रमं नैर्ऋतके तथा**
**कोष्ठागारायुधागारौ वायव्यां च तथा स्मृतौ।**
**कूपादिस्थोदकं शस्तं दिक्षु चैवोत्तरासु च।।**[8]

यथा उपर्युक्तश्लोके निर्दिष्टभवनस्य अङ्गानां निवेशनं दिग्ज्ञानं विना कथं शक्यम्?

सम्प्रति अद्यापि दिङ्निर्णयस्य प्राचीनसाधनानि उपयुक्तानि न सन्ति। अधुना चुम्बकीय– कम्पास– होकायन्त्र द्वारा दिशानिर्धारणं सरलतया कर्तुं शक्यते। अधुना अपि आधुनिकवास्तुकर्मणि दिग्ज्ञानस्य प्रासङ्गिकता एवं महत्ता तथैव वर्तते इति एतेन स्पष्टं भवति। दिग्ज्ञानाधारेण भवननगरादीनां रूपरेखाचित्रं सिद्धं करोति आधुनिकः स्थपतिः।

[8] विष्णुधर्मोत्तरपुराणम्, खण्डः –२, २९.४०–४१

**(३)मानविभाजनम् –**

कस्यापि वास्तुरचनायाः मनोवाञ्छित- आकृति- प्रदानार्थं मान-प्रमाणं महत्त्वपूर्णमस्ति। प्राचीनकाले मानं वा प्रमाणं हस्ताङ्गुलैः प्रयुज्यते। हस्तस्य मानदण्डस्य निर्माणार्थं स्निग्धः, ग्रन्थिहीनः खदिर- शमी- वंशादीनां काष्ठानां वा धातूनां प्रयोगं प्राचीनमनीषिभिः कुर्वन्ति स्म इति समराङ्गणसूत्रधारः, मानसारः, राजवल्लभादिषु प्रायः सर्वेषु ग्रन्थेषु वर्णितं वर्तते। मानप्रमाणाधारेण राजा भोजः तेषां ज्येष्ठः, मध्यमः, कनिष्ठश्च प्राशयः, साधारणः एवं शयः वा मात्राशयश्च इति त्रिविधा संज्ञां प्रदत्तवान्। यथा हि –

**यवाष्टकाङ्गुलैः क्लृप्तः प्रकर्षेणायतः किल।।**

**ज्येष्ठो हस्तः स विद्वद्भिः प्रोक्तः प्राशयसंज्ञितः।**

**यः पुनः कल्पितः सप्तयवक्लृप्तैरिहाङ्गुलैः।।**

**तज्ज्ञैः स मध्यमो हस्तः साधारण इति स्मृतः।**

**मात्रेत्यल्पं यतः प्रोक्तं हस्तश्च शय उच्यते।।**[9]

एतत् त्रिविधं हस्तमानं वास्तुसम्बन्धिनां भूमिः, द्वारम्, सभाभवनम्, वनोपवनम्, मार्गयोजना, जलसंस्थानम्, गुहा, मन्दिरम्, यानम्, शयनम्, कूपः, वापी, सरांसि, शिल्पिनामुपस्कराणि-साधनानि, ध्वजाः आदीनां भिन्न-भिन्नवस्तूनां निर्माणे प्रयुक्तं भवति स्म। एतस्य मान-प्रमाणस्य प्रयोगः कालान्तरे न्यूनो भवति। तथापि नूतनमानस्य प्रचलने हस्तमानमपि प्रचलितमस्ति।

सम्प्रति वास्तुकर्मणि मार्गानां भवनादीनां मान-प्रमाणज्ञाने **फुट** एवं **मीटर, किलोमीटर** इति मानस्य प्रयोगः प्रचलितोऽस्ति। मानस्य ज्ञानं वा प्रयोगस्याभावे गृह-नगरादीनां

---

[9] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.९.२८-३०

निवेशाङ्गानि भित्तिः– द्वारम्– कक्षः– वातायनादीनां विभाजनं निर्माणं च सम्भवं नास्ति। विना मानेन वास्तुकर्म सौन्दर्यं न प्राप्नोति। अतः एव आधुनिककालेऽपि भवन–नगरादीनां निर्माणस्य प्राक् स्थपतिः निश्चितमानोन्मानेन मानचित्रं निर्माणं करोति, अनन्तरं भवनादीनां निर्माणकार्यं करोति। वर्तमानकाले मानसाधनस्य, मानप्रमाणस्य परिवर्तनं जातम् किन्तु तस्य उपयोगिता सर्वदा भवति इति स्पष्टं भवति। अनेन प्रकारेण अधुना अपि मानस्य महत्त्वं वर्तते एवं भविष्यत्कालेऽपि च।

(४)**वास्तुपदविन्यासः** -

नगर–भवनादीनां निर्माणस्य प्राक् वास्तुविद् स्थपतिः नगर–भवनादीनां विभिन्नाङ्गानां निर्माणहेतवे परिगृहीतभूम्याः विभाजनं वास्तुपदमण्डलाधारेण करोति अयं वास्तुपदविन्यासः वा वास्तुपुरुषकल्पनमति कथ्यते। तथैव आधुनिकस्थपतिः वा अभियन्ता भवनस्य वा नगरस्य निर्माणपूर्वं तस्य आन्तरिकस्य बाह्यस्य च प्रारूपस्य रेखाचित्रं मानचित्रं च निर्मितं करोति।

वास्तुपदविन्यासः प्राचीनभारतीयस्थापत्यविज्ञानस्य अष्टाङ्गेषु[१०] प्रथममङ्गमस्ति। अयं वास्तुपदविन्यासः प्राचीनस्थपतीनां कृते आधुनिकस्थपतीनां कृते च निवेशयोजनायां भवनस्य रेखाचित्रं वा नगरस्य रेखाचित्रं मानचित्रं च निर्माणार्थमत्यन्तकं सहायको भवति स्म। यथा हि –

**चतुःषष्टिपदाख्येन पुरं सर्वं प्रकल्पयेत्।**[११]

तथा एकाशीतिपदे गृहं देवालयं च शतपदाख्येन निर्मितव्यमिति सूत्रधारमण्डनः कथयति।[१२] अनेन प्रकारेण सम्पूर्णपदविन्यासेन स्वस्व पदस्वामिनां स्वभावानुसारं सम्पूर्णं

---

[10] समराङ्गणसूत्रधार (पूष्पेन्द्र), अ.४५

[11] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.१०.४

[12] वास्तुमण्डनम्, अ.१.१८

भवन–नगरयोजना– अनुसारं नगर–भवनादीनां परिगृहीतभूमौ दिशोपदिशायां तथा ब्रह्मस्थाने कस्य कस्य निवेशनं करणीयमिति सरलं भवति। विविधवास्तुपदमण्डलानां विस्तृतं वर्णनं द्वितीयाध्याये वर्णितं वर्तते।

वास्तुशास्त्रे वास्तुपदविन्यासविधानं नगर–भवनादीनां निर्माणे महत्त्वपूर्णां भूमिकां भजति। तत्र क्रमशः निवेश्यभूम्याः विविधाकारेण विभाजनं, विभाजितवर्गेषु वास्तुपदमण्डलस्य स्वस्वस्थानेषु देवानां प्रकल्पनं, वास्तुपुरुषस्य प्रतिष्ठा एवं विभिन्नदिशोपदिशायां नगरस्य, ग्रामस्य, राजप्रासादस्य, गृहस्य, मन्दिरस्य इत्यादीनां विविधाङ्गानां निर्माणं भवति स्म। अनेन प्रकारेण अद्यापि वास्तुपदविन्यासः एवं वास्तुपुरुषविकल्पनं नगरभवनादीनां निवेशनस्य प्राक् अवधारणीयमानचित्रस्य वा रेखाचित्रस्य निर्माणे महत्त्वपूर्णं भवति।

### (५)नगरस्य सुरक्षोपायाः –

अस्माकं वास्तुविशारदाः नगरराजप्रासादादीनां सुरक्षा हेतवे केचन निर्देशान् प्रदत्तवन्तः। यथा परिखा, वप्रः, प्राकारः, दुर्गः, अट्टालकः इत्यादिः। वप्रस्य निर्माणं नगरस्य परितो नगरनिवासिनां सुरक्षार्थं दृढभित्तिरूपेण भवति। तस्य निर्माणं परिखयोत्खातया मृत्तिकाद्वारा करणीयम्।[१३] प्राकारस्य निर्माणमपि नगरस्य सुरक्षार्थमेव भवति। वप्रस्योपरि प्रकारं स्थापनीयमिति आचार्यकौटिल्यः दर्शयति।[१४] परिखा नगरादीनां सुरक्षार्थं नगरस्य परितो द्वादश

---

[13] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.१०.१९

[14] अर्थशास्त्रम्,(गैरोला), अधिकरण–२, अ.२,पृ–१०५

हस्ततः अष्टादश हस्तपर्यन्तं[१५] बृहद् गर्तः क्रियते। तस्यापि अधिका विस्तृता परिखा नगरस्य सुरक्षां करोति एवं तेन सह नगरस्य मलमपि वहति इति।[१६]

वर्तमानकाले अत्यधुनिकशस्त्रास्त्राणामाविष्कारे वप्रस्य, प्राकारस्य दुर्गस्य वा परिखायाः उपादेयता अधिकं न वर्तते, परन्तु नगरस्य महत्त्वपूर्णाधिकारिजनानां, राजकीयनेतृणां, उद्योगपतीनां भवनानाम्, अस्माकं सैन्यावासानां, उद्योगभवनानां, औद्योगिकपरिसरानां, महत्त्वपूर्णभवनानां सुरक्षार्थं एतेषां परितो अद्यापि वप्रस्य, प्राकारस्य एवं परिखायाः निर्माणं कृत्वा एतेषां सुरक्षायां काठिन्यं न्यूनं भवति। यथा प्राचीनकाले प्राकारस्योपरि, अट्टालकस्योपरि सैनिकाः उपस्थिताः आसन् तथैव अधुना अपि प्राकारस्य निर्माणं कृत्वा तस्योपरि सुरक्षाकर्मिणाम् उपस्थितिः दृश्यते। भवनस्य परितो भित्त्याः निर्माणं कृत्वा तस्योपरि काचखण्डाः वा कण्टकयुक्त चतुःसीमा – कण्टकावृता (फेन्सिंग) क्रियते। एतेन असामाजिकजनैः, हिंसकपशुभिः रक्षणं भवति इत्याशयः। अतः अनेन प्रकारेण आधुनिकस्थपतिनां युगानुसारं सुरक्षासाधनानां ज्ञानमवश्यं प्राप्यते। अतः अधुनापि प्राचीनसुरक्षोपायानां महत्त्वं वर्तते।

**(६)शिलान्यासः –**

सम्प्रति नगरस्य, भवनस्य, मन्दिरस्य, सेतोः आदीनां निर्माणस्य प्राक् शिलान्यासविधिः सर्वप्रसिद्धः। अधुना एष विधिः एकः संक्षिप्तः कर्मकाण्डीयविधिः एव वर्तते। परन्तु अस्माकं प्राचीनवास्तुशास्त्रीयग्रन्थेषु शुभे मासे तिथि– नक्षत्र– दिन– पक्ष– काल– ग्रहादीनां शुभत्वं दृष्ट्वा शुभे दिने शास्त्रज्ञः, पवित्रः, प्रसन्नचितः स्थपतिः देवार्चनपूजाविधिपूर्वकं शिलान्यासं

---

[15] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.१०.९

[16] भारत का प्राचीन इतिहास (सत्यकेतु), पृ–३७९

करोति स्म इति दर्शितमस्ति।[१७] तथा च शिलान्यासप्रसङ्गे शुभां शिलां परिगृहीत्वा शिला–अभिषेकः, विप्रपूजनं, ॐकार एवं माङ्गलिकगीत–मन्त्रोच्चारं, वाद्यवादनं, बलिपूजनमित्यादीनां विस्तृतविधानस्य वर्णनं प्रतिपादितमस्ति। एतत् विधानं भारतीयानाम् आध्यात्मिकभावनया सह संयोजितमस्ति। अतः शिलान्यासः एकः औपचारिकं कर्मकाण्डमेव नास्ति अपि तु कस्यापि रचनायाः धार्मिकं महत्त्वमपि दर्शयति।

**(७)मार्गव्यवस्था –**

एकस्थानतः अन्यस्थानपर्यन्तं गमनागमनार्थं भूमौ निर्मितरचना इति मार्गः। मानवजीवने मार्गस्य अतीव घनिष्ठमेवं प्रत्यक्षं सम्बन्धोऽस्ति। मार्गः कस्यापि राष्ट्रस्य वा नगरस्य प्रगत्यर्थं अत्यन्तं महत्त्वपूर्णमङ्गमस्ति। मार्गः राष्ट्रस्य जीवननाडी संजीवनी अस्ति। समराङ्गणसूत्रधारग्रन्थे राजाभोजेन राजमार्गः, महारथ्या, रथ्या, घण्टामार्गः, यानमार्गः आदीनां मार्गाणां निर्माणविधानस्य विस्तृतं वर्णनं प्रदत्तम्।[१८] पुरा नगरस्य राजमार्गस्य दृढता आधुनिक राजमार्गाणामपेक्षया हीनं वा न्यूना ना आसीत्। प्राचीनकालेऽपि राजमार्गस्य निर्माणे शिलाखण्डानां सूक्ष्मतया खण्डनं कृत्वा भूमौ प्रसार्यन्ते। तेन राजमार्गस्य दृढतायां वर्धनं भवति स्म। राजमार्गस्य निर्माणे मार्गस्याधारेण अधः प्रथमं षड् इञ्चं बृहत् पाषाणानां वा अश्मखण्डानां भूमौ प्रसारणस्य विधानमस्ति।[१९]

---

[17] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.३५

[18] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.१०

[19] हिन्दी विश्वकोश, खण्ड–११,पृ–४४१

प्राचीनभारतीयनगराणां राजमार्गाणां विस्तृतिः, मार्गाणां संख्या, यानमार्गाणां द्वयोः पार्श्वे जङ्घापथस्य विधानमादिकं तत्कालिकनगरस्य भव्यतायाः उद्घाटनं करोति। अस्माकं भारतदेशे अधुना अपि लघु– लघु– नगराणां, लघु– ग्रामाणां मार्गाणां सङ्कुलता, खण्डितता, ग्रामद्वयमध्ये मार्गस्याभावः दृश्यते। आधुनिकनगरविकासस्य संयोजकाः, आधुनिकस्थपतिः अस्माकं प्राचीनवास्तुशास्त्रीयग्रन्थेषु वर्णितमार्गनिर्माणविधानस्य प्रेरणां गृहीत्वा आधुनिक आवश्यकतानुसारं मार्गनिर्माणं करोति तदा जनानां सञ्चारणे, वस्तूनां आयात–निकासे सुविधा भवति, समयस्य च इंधनस्य व्ययः अपि न्यूनो भवति । अतः अस्माकं राष्ट्रस्य विकासः अपि त्वरितं भविष्यति। किञ्चित् विलम्बेन अपि तु प्रायः सप्त वा अष्ट वर्षात् भारतसर्वकारः मार्गनिर्माणस्य योजनायां प्रवृत्तः अस्ति। किन्तु एतत् योजनायाः शीघ्रतातिशीघ्रं पूर्णो भवेत् इति आवश्यकमस्ति।

**(८) जातिवर्णाधिवासः –**

जातिवर्णाधिवासः[२०] समराङ्गणसूत्रधारग्रन्थे राजा भोजः विस्तारपूर्वकं प्रतिपादितवान्। इदं पञ्चमाध्याये विस्तृतरूपेण वर्णितं वर्तते। अतः अहं पुनः वर्णनं न करोमि। जातिवर्णाधिवासः वर्ण–प्रथाप्रेरितो लगति एवं सम्प्रति अप्रासङ्गिकं प्रतीतो भवति, परन्तु तस्य उद्देशः अद्यापि उपयुक्तो वर्तते। नगरस्य योजनापूर्वकं निवेशने समानं शिक्षा, समानं सम्पत्तिः, समानं गुणयुक्तजनानां निवेशनम् एकस्मिन् स्थले उत्तमं भवति। अत्युच्चजनानां मध्ये अतिनिम्न आययुक्तजनाः, पूर्णशिक्षितजनानां मध्ये अशिक्षितजनाः, कलासम्पन्नजनानां मध्ये असभ्यजनाः यदा निवसे तदा तत्र कियान् दुष्परिणाम आगमिष्यति, एतस्य अनुमानं वयं कर्तुं शक्नुमः। समानं व्यवसायः एवं समानं आय वा समानं धर्मयुक्त इति समानगुणधर्मयुक्त जनानां मध्ये व्यक्तिः स्वयं सहज– अनुभवं करोति इति मनोवैज्ञानिकं तथ्यमस्ति। अधिक–

---

[20] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.१०.८८–१०३

सम्पन्न- आवासानां समीपस्थ लघु-लघु गृहेषु निवासितजनाः नित्य घृणितं भवन्ति। केवलं जाति-वर्णाधारेण व्यवस्था न भवेत् परन्तु यद्यपि जनाः स्वस्य जातिः, समान व्यवसायः, समान- आयः, समानवर्गः आदि समानतां दृष्ट्वा स्वस्यसमानस्तरयुक्तजनानां मध्ये निवासं कर्तुमिच्छन्ति। आधुनिकनगरेषुग्रामेषु अद्यापि एतावन्ति आवासस्थानानि वर्तन्ते। बौद्धिकरूपेण एवं भौतिकरूपेण समानव्यक्तीनाम् एकपरिवेशने निवासने तेषां मध्ये उच्चतायाः वा हीनतायाः अनुभवो न भवति। अतः अयं वास्तुशास्त्रीयग्रन्थेषु वर्णितजातिवर्णाधिवासस्य अभिप्रायः प्रतीतो भवति। तथा अन्यकर्मोपजीविजनाः यथा वैश्यानां, चिकित्सकानां, सुरक्षाकर्मिजनानां,[२१] सेनायाश्च निवासस्थानानि नगरस्य चतुर्दिक्षु स्थापनीयानीति राजा भोजेन दर्शितम्।[२२] कारणम् एतेषां समाजे नगरे झटिति कस्यापि समये आवश्यकता भविष्यति।

वास्तुशास्त्रीयग्रन्थेषु पुरस्य वा नगरस्य विभिन्नस्थलेषु विभिन्नवर्णानामेवं विभिन्नकर्मोपजीविजनानां निवेशव्यवस्थायां नगरे आवासीय भवनानां तथा औद्योगिक भवनानां सन्निवेशनं पृथक्-पृथक् भिन्न-भिन्नस्थलेषु करणीयमिति बोधः प्राप्यते। वर्तमानकाले भारतदेशे लघु-लघुनगरेषु आवासीयभवनेषु एवं लघु-उद्योगस्य कार्यं भवति। तेन तत्र अग्नि- आदि दुर्घटनायाः भयं भवति। अतः वास्तुशास्त्रीयनियमानानुसारं नगरेषु सुनियोजिता सन्निवेश-व्यवस्था भवेत् तदा तत्र दुर्घटनाया एवं ध्वनि-प्रदूषणस्य समस्यायाः अपि निवारणं भवति। रसायण-उद्योगः, चर्म-उद्योगः तथा धातु-उद्योगः एतेषु उद्योगेषु अग्निभयमेवं प्रदूषितविषैलवायोः प्रसारणस्य च विस्फोटस्य सम्भावना भवति। एतेषां भवनानां प्रारूपं विशिष्टरूपेण योजनीयं तथा तत्र अग्निशामकयन्त्र- आदि- विशेषयन्त्राणां स्थापना अवश्यं करणीया। अतः तस्य दुष्प्रभावात् सुरक्षार्थं हरित-क्षेत्रेषु एतादृशा उद्योगभवनानां स्थापना

---

[21] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.१०.१०१

[22] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.१०.१०३

करणीयमिति अस्माकं प्राचीनभारतीयवास्तुशास्त्रीयग्रन्थेषु भूपरिग्रहविषयान्तगर्तं प्रशस्यभूम्याः विशेषतायाः वर्णने विस्तृतरूपेण विवेचनं विद्यते।

**(९)नगरस्य सौन्दर्यीकरणम्** –

भारतीयवास्तुशास्त्रीयग्रन्थेषु नगरस्य सन्निवेशने नगरस्याङ्गानां भवनानां, मार्गाणां, प्राकार–परिखायाः, सभा–भवनानां, राजप्रासादानां निर्माणविधिद्वारा उत्कृष्ट स्थापत्यकलायाः परिचयः अस्माकं प्राचीनवास्तुविशारदानां प्राप्यते। तेन सह नगरे मन्दिराणां, तडागानां, सरांशिनां, वापीनां, वाटिकानां संस्थापने यथास्थलेषु नगरस्य सौन्दर्यस्य एवं नागरिकाणां स्वास्थ्यं सम्यक् भवेत् इति उद्देशस्य प्रमाणं प्राप्यते।

अस्माकं भारतदेशः आध्यात्मिकदेशः अस्ति। भारतीयजनानां जीवनं प्राचीनकालादारभ्य आध्यात्मिकं धर्ममयं चास्ति। भारतीयजनानां धार्मिकस्य सात्विकस्य बौद्धिकस्यजीवनस्य फलस्वरूपेण तेषां जीवनस्य प्रत्येकेषु कार्येषु देवानां सम्बन्ध आसीत्। नगरस्य आन्तरिकमेवं बाह्यं कलात्मकानाम्, अलङ्कृतानां भव्यमन्दिराणां स्थापने नगरस्य शोभयां वृद्धिर्भवति। नगरे स्थितानां भवनादीनां मुख्यप्रवेशद्वारे लक्ष्मी–कुबेर–विष्णु–शङ्ख – पद्म– ध्वजा– कलश–श्रीफलादीनां चित्राङ्कनेन अपि नगरस्य अलङ्करणं भवति। एतैः शुभचिह्नैः नगरस्य शोभा तु वर्धते अपि तु नगरे शान्तिः समृद्धिः एवं प्रसन्नता सदैव वर्तते। समराङ्गणसूत्रधारग्रन्थे नगरस्य अष्टौ दिशोपदिशायां बहिः अन्तश्च देवी–देवतानां स्थापनस्य निर्देशो दृश्यते।[२३] एतेन स्पष्टं भवति यत् भारतीयजनानां जीवने भौतिकतायाः अपेक्षया आध्यात्मिकतायाः तथा अर्थस्य एवं कामस्य अपेक्षया धर्मस्य महत्ता अधिकासीत्, अधुना अपि वर्तते।

---

[23] समराङ्गणसूत्रधारः (पुष्पेन्द्र), अ.१०.१०४–१११

प्राचीनभारते नगरस्य अलङ्करणार्थं नगरे विशेषरूपेण मन्दिराणामेवं भित्तिचित्राणामतिरिक्तं नगरेषु एवं नगरप्रान्तेषु उद्यानानां, सरसां, तडागानां, आरामवाटिकानां, वापी–कूपादीनाम्, अनुरञ्जनशालादिजनस्थानानां स्थापनेन  नगरं सुसज्जितं सुन्दरमलङ्कृतं च दृश्यते। नगरनिवेशनमेतावत् सुनियोजितं आसीत् यथा नगरे विभिन्नजनानां निवासस्थलस्य मध्ये अधिकमन्तरं रिक्तस्थानस्य व्यवस्था आसीत्, तत् कारणात् तत्र स्वच्छवायुः एवं सूर्यकिरणस्य प्राचुर्यं भवेत् इति। वास्तुशास्त्रीयग्रन्थानुसारं दुर्ग–प्राकार–वप्र–परिखया परिवेष्टित नगरद्वारं, रथ्या, सुन्दर उपवनेन सुशोभिते नगरे स्थले–स्थले विशालानि उद्यानानि स्थितानि आसन्। नगरस्य सुरक्षायैः परिखा चतुदिक्षु पुष्पाणां, सुरम्यलता–गुल्म–वृक्षैः मण्डितासीत्। किञ्च विशेषवृक्षाणाम् अस्माकं शास्त्रेषु प्रत्येकदिशायां पवित्रेण पूज्यभावेन च वपनस्य संवर्धनस्य च निर्देशः दृश्यते।

**२.प्राचीनभारतीयप्रमुखनगराणां संक्षिप्तपरिचयः –**

अस्माकं पूर्वजाः वास्तुकलायां विशारदाः आसन्। प्राचीनभारते नगराणां सन्निवेशनं योजनाबद्धं, सुव्यवस्थितं, सुरक्षितमेवं सुविधायुक्तं भवति स्म। एतेन नगरवासिनां जीवनयापनं सरलं भवति स्म। कालान्तरेण मानवसभ्यतायाः विकासेन सह मानवानामावश्यकतायाः अपि वर्धनमभवत्। मानवानामावश्यकतानां पूर्त्यर्थं शासकाः राजानश्च स्वस्य ग्रामे वा नगरे विद्वज्जनेभ्यः, शिल्पिभ्यः, व्यवसायिभ्यः आश्रयं ददाति स्म। अतः ग्रामाणां, नगराणां च विकासो जातः तथा नूतननगराणां निर्माणमपि सुनियोजितरूपेण अभवत्।

नगरनिर्माणस्य सम्बन्धिसैद्धान्तिकनियमानां ज्ञानं वास्तुशास्त्रीयग्रन्थेषु प्राप्यते। परन्तु प्राचीनकालिकनगरेषु एतेषां वास्तुशास्त्रीयनियमानां परिपालनं भवति न वा इति ज्ञानार्थं केषाञ्चन प्राचीनभारतीयप्रमुखनगराणां विहङ्गावलोकनमत्र कृतमस्ति। प्राचीनभारतीयप्रमुखनगराणां सांस्कृतिकम्, ऐतिहासिकम्, धार्मिकमेवं विशेषरूपेण वास्तुशास्त्रीयदृष्ट्या समीक्षात्मकमध्ययनं संक्षेपेण प्रतिपादितमस्ति।

**(१)द्वारकानगरम्** -

हरिवंशपुराणं- महाभारतादिप्राचीनग्रन्थानुसारं द्वारकानगरस्य स्थापनं भगवान् श्रीकृष्णः अकरोत्। हरिवंशपुराणानुसारं एतस्य प्रमाणम्

**अष्टयोजनविस्तीर्णामचलां द्वादशायताम्।**[२४]

तथैव श्रीमद्भागवतपुराणेऽपि तस्य प्रमाणं **द्वादशायताम्।**[२५] इति दर्शितम्। द्वारकानगर्यां प्रत्येकवस्तूनां निर्माणे विश्वकर्मणः वास्तुविज्ञानस्य एवं शिल्पकलायाः सौदर्यं दृश्यते। वास्तुशास्त्रीयसिद्धान्तानुसारं बृहद्मार्गाणां, चत्वराणां, वीथी-रथ्या- आदीनां स्थापनं योजनाबद्धरूपेण यथास्थानेषु आसीत्। यथा हि -

**दृश्यते यत्र हि त्वाष्ट्रं विज्ञानं शिल्पनैपुणम्।**

**रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मितम्।।**[२६]

द्वारकानगर्याः चतुर्दिक्षु श्वेतवर्णस्य प्राकारः आसीत्। यथा -

**प्राकारावरसम्पन्नां सुधापाण्डुरलेपनाम्।**[२७]

---

24 हरिवंशपुराणम्, विष्णुपर्व, अ.१९९.२७

25 श्रीमद्भागवतपुराणम्, स्कन्धः-१०,अ. ५०.५०

26 श्रीमद्भागवतपुराणम्, स्कन्धः-१०,अ. ५०.५१

27 हरिवंशपुराणम्, विष्णुपर्व, अ.१००.२४

तथा एकया परिखया परिवेष्टितमासीत्। परिखा पद्मयुक्ता तथा हंससेविता आसीत्। यथा हि –

**पद्मखण्डाकुलाभिश्च हंससेवितवारिभिः।**

**गङ्गासिन्धुप्रकाशाभिः परिखाभिर्वृतां पुरीम्।।**[२८]

तथा ................................ **प्रासादवरचत्वरैः।**

**समुच्छ्रितपताकानि पालिप्लववनानि च।।**[२९]

द्वारकानगरं वप्रैः, सरोवरैः, बृहद् उद्यानैः, प्राकारैः, अनेकप्रासादैः सुशोभितमासीत्। यथा हि –

**महोद्यानां महावप्रां तडागशतशोभिताम्।**

**प्राकारगृहसम्बाधामिन्द्रस्येवामरावतीम्।।**[३०]

शिशुपालवधेऽपि –

**अदृश्यतादर्शतलामलेषु च्छायेव या स्वर्जलधेर्जलेषु।**[३१]

तथा द्वारकानगर्याः स्वर्ण–निर्मितमुन्नतं शिखरं नभःस्पर्शं करोति इति भव्यमासीत्। एतादृशा –

**ददृशी द्वारका रम्या चारुमेघैर्घौरिव संवृता।**[३२]

---

[28] हरिवंशपुराणम्, विष्णुपर्व, अ.९९.११

[29] हरिवंशपुराणम्, विष्णुपर्व, अ.१००.३२

[30] विष्णुपुराणम्, ५, अ.२३.१४

[31] शिशुपालवधः, सर्गः–३.३५

[32] हरिवंशपुराणम्, विष्णुपर्व, अ.१००.३८

एवमत्र द्वारकानगर्यां वास्तुशास्त्रीय सिद्धान्तानां परिपालनं दृश्यते।

**(२)प्रभासपाटणनगरम्** –

प्रभासपाटणनगरं भारतवर्षस्य धार्मिकनगरमासीत्, अधुना अपि वर्तते। आधुनिकसोमनाथस्य प्राचीनं नाम प्रभासः आसीत्। महाभारते –

**प्रभासे चोदधौ तीर्थं त्रिदशानां युधिष्ठिर।** [३३]

इति उल्लेखो वर्तते। अर्थात् प्रभासनगरम् उदधितीर्थमासीत्। पश्चिमसमुद्रतटस्योपरि अवस्थितमेतत् नगरं विशेषरूपेण प्रसिद्धमासीत्। यथा हि

**समुद्रे पश्चिमे यानि तीर्थान्यायतनानि च।**

**तानि सर्वाणि गत्वा स प्रभाप्समुपजग्मिवान्।।** [३४]

अत्र युधिष्ठिरो दशदिन पर्यन्तं तपः कृतवान्। यथा –

**समन्ततोऽग्नीनुपदीपयित्वा तेपे तपो धर्मभृता वरिष्ठः।** [३५]

प्रभासनगरस्य अपरं नाम **सोमनाथः** इति उल्लेखो अग्निपुराणे प्राप्यते। यथा हि –

**तीर्थं चर्मण्वती सिन्धुः सोमनाथः प्रभासकम्।** [३६]

एतत् नगरं समुद्रतटस्योपरि अवस्थितमतो व्यवसायिककेन्द्ररूपेणापि प्रसिद्धं जातम्। एतत् कारणात् प्रभासनाम्ना सह पत्तनम् इति शब्देन सह एतत् नगरं प्रभासपाटण इति नाम्ना प्रख्यातं जातम्। कूर्मपुराणे प्रभासे शिवमन्दिरस्य वर्णनं प्राप्यते। यथा –

---

[33] महाभारतम्, वनपर्व, अ. ८६.१७

[34] महाभारत, आदिपर्व, अ. २१०.२

[35] महाभारत, वनपर्व, अ. ९४.१७

[36] अग्निपुराणम्, अ. १०९.१०

**अन्यच्च तीर्थप्रवरं सिद्धवासमुदाहृदतम्।**

**प्रभासमिति विख्यातं यत्रास्ते भगवान्भवः।।**[३७]

सोमनाथनगरे स्थितस्य शिवालयस्य कारणात् धार्मिकक्षेत्ररूपेण एतत् नगरं कीर्तितम्। सोमनाथमन्दिरस्य आर्थिक सहायता हेतवे भारतीयराजभिः ग्रामाः दान दन्ताः। मन्दिरस्य दर्शनार्थं समागतैः अपि यथाशक्ति दानं दीयते स्म। तत्कारणात् मन्दिरस्य समृद्धयाः वृद्धिरभवत्।[३८]

**(३)भृगृकच्छम्** –

गुजरातराज्ये स्थितमाधुनिकं भरुच इति नगरं पुराकाले भृगुकच्छ इति नाम्ना प्रख्यातम्। भृगुकच्छनगरं प्राचीनभारतस्य प्रसिद्धं नगरमासीत्। एतत् नगरं भृगुपुरं वा भृगुतीर्थमपि कथ्यते स्म। कूर्मपुराणानुसारमत्र भृगुऋषिः तपः कृतवान्। अतः भृगुतीर्थमिति नाम्ना नगरं प्रख्यातं जातम्। यथा हि –

**ततो गच्छेत् राजेन्द्र भृगुतीर्थमनुत्तमम्।**

**तत्र देवो भृगुः पूर्वं रुद्रमाराधयत्पुरा।।**[३९]

भृगुकच्छतः एकः मार्गः उज्जयिनीतः पाटलिपुत्रपर्यन्तमासीत्। उज्जयिनीतः अत्र मलयवस्त्रं, मलमलवस्त्रादिकं नैकप्रकाराणानि वस्त्राणि आगच्छन्ति स्म।[४०] काबुलदेशस्य व्यापारिकाः निर्यातकरणार्थं स्वस्य वस्तूनि अत्र आनयन्ति स्म। तथा इतः हस्तिदन्तं,

---

[37] कूर्मपुराणम्, २, अ.३४.१६

[38] प्राचीनभारत में नगर तथा नगर–जीवन, पृ–२१०

[39] कूर्मपुराणम्, २, अ.४०.१

[40] सार्थवाह, पृ–११७

क्षौमकार्पासवस्त्राणि, मरीचिका- आदीनां निर्यातः अपि भवति स्म।[४१] विदेशात् अत्र मदिरा, सूक्ष्मवस्त्राणि, स्वर्णं, रजतमुद्रा तथा ताम्रादीनां वस्तूनाम् आयातः अपि भवति स्म।[४२] सुप्पारकजातके भृगुकच्छस्य व्यापारिकानामुल्लेखः प्राप्यते। यथा हि –

**भृगुकच्छा पयातानं वणिजानं धनेसिनम्।**

**नावाय विपणत्थाय .....................।।**[४३]

भृगुकच्छस्य व्यापारिकाः नावाय जलमार्गेण स्वर्णभूमिं गच्छन्ति स्म। यथा –

**तदा च भरुकच्छवणिजा नावाय सुवर्णभूमिं गच्छति।**[४४]

**(४)प्रवरपुरम्** –

प्राचीनं प्रवरपुरम् आधुनिकं श्रीनगरम् इति नाम्ना विख्यातम्। एतस्य निर्माणं प्रवरसेनद्वितीयः कृतवान्।[४५] प्रवरसेनद्वितीयस्य समयः अष्टम शताब्दी मन्यते। बरनीयारस्य मतानुसारं काश्मीरप्रदेशस्य राजधानी काश्मीर एव आसीत्। शिखजनाः इ.स. १९६१ तमे वर्षे काश्मीरप्रदेशस्योपरि विजयं प्राप्तवन्तः तदा पुनः काश्मीरप्रदेशस्य राजधान्याः नाम श्रीनगरम् इति प्रचलितम्। बरनीयर तथा मुस्लिमजनाः एकोनविंशतिशताब्दीपर्यन्तं श्रीनगराय **कश्मीर** वा **कशूर** इति नाम्ना सम्बोधयन्ति स्म।[४६]

विक्रमाङ्कदेवचरिते बिल्हणः प्रवरपुरं काश्मीरस्य प्रमुखं नगरं दर्शयति। यथा हि –

---

41 प्राचीनभारत में नगर तथा नगर-जीवन, पृ-२०७

42 सार्थवाहः, पृ-११७

43 जातकम्, ४.१४०

44 जातकम्, ३.१८८

45 राजतरङ्गिणी (रघुनाथसिंहः), भाग-१,पृ-१३९

46 राजतरङ्गिणी (रघुनाथसिंहः), भाग-१, १४०

**काश्मीरेषु प्रवरपुरमित्यस्ति मुख्यं पुराणाम्।**[४७]

श्रीनगरस्य समीपे वितस्तानद्याया: तरङ्गप्रवाहेण नगरस्य शोभा अतिरमणीया दृश्यते। यथा हि –

**यस्यायान्ति प्रकृतिकुटिलास्ते वितस्तातरङ्गाः।**[४८]

तत्र उद्यानानां सुन्दरता अतीव नयनरम्यासीत् इति निम्नदर्शितश्लोके प्रदर्शितमस्ति। यथा हि –

**उद्यानेभ्यः सकलभुवनार्श्चमाधुर्यधुर्यम्।**

**पीत्वा द्राक्षारसमिव कर्जातसन्तापशान्तिः।**[४९]

अत्र प्राय: सर्वगृहाणि वाटिकायुक्तानि दृश्यते।[५०]

तथा अत्र **यस्मादुच्चैः स्फुरितमहसां ब्राह्मणानां निवासाः।**[५१] स्थितमासन्। एवं जना: अत्र **व्याख्याभिख्याप्रणयिनि जगद्दुर्लभे सूरिचक्रे।**[५२]

अत्र स्त्रीणामपि मातृभाषारूपेण संस्कृतमेवं प्राकृतभाषायां सम्भाषणं भवति स्म। यथा हि –

**यत्र स्त्रीणामपि किमपरं जन्मभाषावदेव**

**प्रत्यावासं विलसति वचः संस्कृतं प्राकृतं च।**[५३]

---

[47] विक्रमाङ्कदेवचरितम्, सर्गः–१८,पृ–१७७

[48] विक्रमाङ्कदेवचरितम्, सर्गः–१८,पृ–१७७

[49] विक्रमाङ्कदेवचरितम्, सर्गः–१८,पृ–१७८

[50] राजतरङ्गिणी (रघुनाथसिंहः), भाग–१, १४०

[51] विक्रमाङ्कदेवचरितम्, सर्गः–१८,पृ–१७९

[52] विक्रमाङ्कदेवचरितम्, सर्गः–१८,पृ–१८०

[53] विक्रमाङ्कदेवचरितम्, सर्गः–१८,पृ–१८१

**(५)वाराणसी –**

सम्प्रति काशी एवं वाराणसी द्वयोर्नाम परस्परं पर्यायनामानि वर्तते। परन्तु प्राचीनकाले भिन्नतासीत्। काशी महाजनपदः आसीत्[५४] तथा जातकानुसारं **कासीरट्ठे बारानसीयम्।**[५५] अर्थात् वाराणसी काश्याः राजधानी आसीत्। जातकग्रन्थेषु वाराणस्याः सुरुन्धन– सुदस्सन– ब्रह्मावर्द्धन(ब्रह्मवड्ढज)– पुष्पवती– रम्य(रम्यनगर)– मोलिनी– आदि– नामानि उपलब्धानि वर्तन्ते। पतञ्जलिनः मतानुसारम् –

**वणिजो वाराणसीं जित्वरीत्युपाचरन्ति।**[५६]

अर्थात् व्यापारिकवर्गेषु वाराणसी **जित्वरी** इति नाम्ना विख्याता। तथा एतत् नगरं गङ्गातटस्योपरि स्थितमस्ति इति दर्शितम्। यथा –

**अनुगङ्गं वाराणसी गङ्गा चाप्यायता वाराणस्यप्यायता।**[५७]

कूर्मपुराणानुसारम् –

**वरणायास्तथा चास्या मध्ये वाराणसी पुरी।**[५८]

वाराणस्याः चतुर्दिक्षु सुरक्षाहेतवे परिखा निर्मितासीत्।[५९] तथा एतत् नगरमुच्चप्राकारेण परिवेष्टितमासीत्। प्राकारस्य चतुर्दिक्षु चत्वारि द्वाराणि स्थापितान्या। रात्रौ नगरस्य अन्तः प्रवेशः न भवति स्म। प्रातःकालपर्यन्तं प्रतीक्षां करणीयासीत्।[६०]

---

54 अङ्गुतरनिकाय, १.२१३,४.२५२

55 जातकम्, १.४

56 महाभाष्य, ४.३.८४,पृ–२१२

57 महाभाष्य, २.१.१५,पृ–३६४

58 कूर्मपुराणम्, अ.३०.६३

59 जातकम्, २.१६४

अस्मिन् नगरे विभिन्नभागेषु भिन्न–भिन्नवर्णानामेवं भिन्न–भिन्नकर्मोपजीविनामावासानां व्यवस्था उत्तमासीत्। जातकग्रन्थानुसारं वाराणसीनगर्याः विस्तारः द्वादशयोजनः मन्यते।[६१] गुट्टिल–जातके एतत् नगरं भारतदेशस्य सर्वश्रेष्ठं नगरं कथितम्।[६२]

वाराणसीनगर्यां गङ्गास्नानस्य अतीव विशेष महत्त्वं वर्तते इति लिङ्गपुराणे उल्लेखो दृश्यते। यथा हि –

**स्नानात्संसेवनाद्वापि न मोक्षः प्राप्यते यतः**

**इह सम्प्राप्यते येन तस्माद् एतद्विशिष्यते।।**[६३]

अत्र स्नानात्संसेवनात् मोक्षप्राप्तिर्भवति इति मन्यते। अधुना अपि अस्या मान्यतायाः महत्त्वं तथैव वर्तते। अतः वाराणसी प्राचीनकालादारभ्य अधुनिककालपर्यन्तं धर्मस्य संस्कृतेः एवं ज्ञानस्य महत्त्वपूर्णं विशिष्टं केन्द्रमस्ति।

**(६)कपिलवस्तु –**

कपिलवस्तु बौद्धकालीकमेकं समृद्धं नगरमासीत्। भारतीयपुरातत्त्वविभागस्य सर्वेक्षणानुसारं कपिलवस्तुनगरं वर्तमानस्य उत्तरप्रदेशस्य सिद्धार्थनगरजनपदस्य नौगढतः २२ कि.मी. दूरं स्थितमासीत्। बुद्धचरितानुसारम् –

**पुरं महर्षेः कपिलस्य वस्तुः।**[६४]

---

[60] जातकम्, २.१५५

[61] जातकम्, ५.३७७, ६.१६०

[62] जातकम्, २.२४३

[63] लिङ्गपुराणम्, अ.९२.४७

[64] बुद्धचरितम्, सर्ग–१.२

अर्थात् महर्षिकपिलस्य तपोभूमिः आसीत्। सम्भवतः तस्मात् कारणात् तस्य नाम कपिलवस्तु इति प्रख्यातम्। यथा हि

**कपिलस्य च तस्यर्षेस्तस्मिन्नाश्रमवास्तुनि।**

**यस्मात् तत्पुरं चक्रुस्तस्मात्कपिलवास्तु तत्।।**[६५]

अस्मिन् नगरे एका विस्तृता परिखा नदी समानासीत्। तथा अत्र भव्यः राजमार्गः एवं गिरिवज्रसमान उच्चवप्रः अपि आसीत्। यथा हि –

**सरिद्विस्तीर्णपरिखं स्पष्टाञ्चितमहापथम्।**

**शैलकल्पमहावप्रं गिरिवज्रमिवापरम्।।**[६६]

पालिग्रन्थानुसारम् –

**कपिलवस्तु सप्त हि प्राकारैः परिक्षिप्तो अभूषि।**[६७]

अर्थात् कपिलवस्तुनगरं सप्त प्राकारैः परिवेष्टितमासीत्। अस्य प्राकारस्य उदयमानम् अष्टादशहस्तमासीत्। यथा –

**अट्ठावसहट्ठुब्बेधम् पाकारम्।**[६८]

ललितविस्तरानुसारं कपिलवस्तु –

**उद्यान–आराम–विहारमण्डिता।**[६९] नगरी आसीत्। नगरस्य अन्तः सुन्दरा शालाः तथा आपणेन सुशोभितमासीत्। बुद्धचरिते एतत् नगरं **पुराधिराजः** इति कथितम्।[७०]

---

65 शौन्दरानन्दः, सर्गः–१.५७

66 सौन्दरानन्दः, सर्गः–१.४२

67 महावस्तुः, २.७५,पृ–१०६

68 जातकम्, १.६३

उपर्युक्तप्राचीनभारतीयनगराणां संक्षिप्तपरिचयेन स्पष्टं भवति यत् तत्कालीकभारतवर्षे नगराणां सन्निवेशने महत्त्वपूर्णानां वास्तुशास्त्रीयनियमानामुपरि विशेषं ध्यानं दीयते स्म। अत्र एतत् स्पष्टं दृश्यते यत् भारतीयस्थापत्यविज्ञाने स्थापत्यनिर्माणकार्ये विविध प्रक्रियायां भूमिस्थानचयनस्य प्रक्रियाया: अधिकं महत्त्वं वर्तते। नगरसन्निवेशनं नद्या वा समुद्रतटस्योपरि, सुरम्यस्थलोपरि, वृक्ष–लतादीनामाधिक्ययुक्तस्थलेषु, पर्वतस्योपरि वा पर्वतस्य समीस्थे, गिरिगह्वरे, पर्वतैः परिवेष्टितस्थलेषु, प्राकृतिकसौन्दर्ययुक्तस्थलेषु सुन्दरस्थलेषु नगराणां सन्निवेशनं करणीयमिति बोधः प्राप्यते।

सम्भवतः अनेन कारणेन अधिकांशप्राचीनभारतीयनगराणि एतादृशेषु स्थलेषु स्थितान्यासन्। प्रायः प्राचीननगराणि सुप्रसिद्धराजमार्गैः, सम्बन्धितान्यासन्। अतः कस्यापि नगरस्य विकासः तस्य यातायातस्य एवं व्यापारिकप्रगतीनामुपरि आधारितोऽस्ति। नगरनिवेशने विविधस्थलानां जलमागैः एवं स्थलमार्गैः नियोजनं क्रियते स्म। तेन नगरजनानां जीवनोपयोगीनि वस्तूनि सरलतया सुलभतया उपलभ्यन्ते। एतेन जनानां सुरक्षात्मकता, स्वास्थ्यप्रियता, व्यापारिकी समुन्नतिः आदीनां प्रति जागरूकतायाः दर्शनं भवति।

यस्मिन् नगरे सुरक्षाहेतवे प्राकृतिकदुर्गादिसाधनानामनुपस्थितिः वर्तते, तस्मिन् नगरे सुरक्षार्थं कृत्रिमसुरक्षासाधनानामुपयोगो भवति स्म। यथा वप्र– प्राकार– परिखादीनां निर्माणं भवति स्म। यथा हि –

**यस्मिन्राज्ये गिरिर्नास्ति नद्यो वा गहनोदकाः।**

**तस्य मध्ये महीपालः कृत्रिमं दुर्गमारभेत्।।**[७१]

---

[69] ललितविस्तरः, अ.३.३८

[70] बुद्धचरितम्, सर्गः–१

[71] युक्तिकल्पतरुः, द्वन्द्वयुक्ति, १२६

एतेषु नगरेषु निर्मितानां परिखा– अट्टालकः– नगरद्वाराणि– आदीनां विधानं वास्तुशास्त्रीयनियमानुसारं दृश्यते। नगरविन्यासान्तर्गतं नगरस्य आन्तरिकविन्यासस्य व्यवस्थायामपि वास्तुशास्त्रीयस्थापत्यस्य सिद्धान्तानामनुपालनं विद्यते। प्रायः तत्कालीक प्राचीनभारतीयनगरेषु नगरस्य सन्निवेशने प्रशस्ताकाराणामनुसरणं क्रियते स्म। अनेन प्रकारेण प्राचीनभारतीयनगरेषु सैद्धान्तिकमेवं वैज्ञानिकं वास्तुशैल्याः दर्शनं भवति।